International Journal of Sanskrit Research 2020; 6(3): 16-18

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(3): 16-18
© 2020 IJSR
www.anantaajournal.com
Received: 12-03-2020
Accepted: 14-04-2020

डॉ. तोय निधि वैश्णव
(प्राध्यापकः विभागाध्यक्षश्च व्याकरणम्) शा.संस्कृत महाविद्यालय रायपुरम् छत्तीसगढ़, भारत

भगवानी निशाद
शोधच्छात्रः शा.दू.श्री.रा.म.वै. स्नातकोत्तर संस्कृत महाविद्यालय रायपुरम् छत्तीसगढ़, भारत

Corresponding Author:
डॉ. तोय निधि वैश्णव
(प्राध्यापकः विभागाध्यक्षश्च व्याकरणम्) शा.संस्कृत महाविद्यालय रायपुरम् छत्तीसगढ़, भारत

# पुराणेशु विद्यमानं शारीरकं विज्ञानम् (गरूडपुराण सन्दर्भे)

## डॉ. तोय निधि वैश्णव, भगवानी निशाद

गरूडपुराणकारः शरीरं इन्द्रजालं मन्यते । 7 यथा ऐन्द्रजालिक इन्द्रजालं रचयति । तथैव ईश्वरोऽपि शरीरं रचयति । शरीरं कि भवति ? कथं कार्यं करोति ? इत्यादिकं सर्वं गरूडपुराणें निगदितम् । अतः गरूडपुराणे विद्यमानं शारीरविज्ञानम् इति विशयमधिकृत्य मया शोधालेखमिदं विरचितम्

आयुषो वेदः आयुर्वेदः उच्यते। आयुरिति पदस्यार्थः प्रायः अनेके आचार्याः पृथक्–पृथक् स्वीकुर्वन्ति। अमरकोषकारो जीवितकामलेव आयुः मन्यते।1 चरकः 'शरीरेन्द्रियसत्त्वात्मसंयोगो आयुः इति स्वीकरोति। धारि जीवितं नित्यगोऽनुबन्धश्च इत्येते तस्य पर्यायाः सन्ति तद्यथा–

'शरीरेन्द्रियसत्त्वात्मसंयोगो धारि जीवितम।
नित्यगश्चानुबन्धश्च पर्यायैरायुरूच्यते !!2

सुश्रतोघ्स्यार्थ पञ्चभूतशरीरिसमवायः पुरूषः स्वीकरोति। 3 इत्यादीनां विवेचनेन स्पष्ट भवति यत् आयुर्वेदस्य मुख्यो विषयः शरीरम् एव वर्तते। जरायुजाण्डजोद्भिज्जस्वेदजभेदैः शरीराणि चतुर्धा भवन्ति। तद्यथा–
चतुर्विधशरीराणि तु जरायुजाण्डजोद्भिज्जस्वेदजाख्यानि। 4 गरूडपुराणकारः 'शरीराणि चतुरशीतिलक्षानि स्वीकरोति। एतानि सर्वाणि शरीराणि जरायुजादिषु चतुर्षु शरीरवर्गेषु विभक्तानि। तद्यथा–

एवमेव समाख्यातं ' शरीरं ते चतुर्विधम्।
चतुरशीतिलक्षानि निर्मितानि मया पुरा।।
स्वेदजा उद्भिज्जाश्चैव अण्डजाश्च जरायुजाः।5

शरीरसम्बधितं विज्ञानं 'शारीरविज्ञानमुच्यते। आयुर्विज्ञानस्य' शारीरविज्ञानं अत्यन्तमहत्त्वपूर्णो विषयो वर्तते। अतः चरकेण सुश्रुतेन च स्वकीयसंहितायां 'शारीरस्थानस्य प्रमुखतया स्थापनं कृतम्। जरायुभ्योजातानि 'शरीराणि जरायुजानि कथ्यन्ते। अस्मिन् वर्गेआयान्ति मनुष्यपश्वादीनि।
तद्यथा–
जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादीनि।6 गरूडपुराणकारः 'शरीरं इन्द्रजालं मन्यते।7 यथा ऐन्द्रजालिक इन्द्रजालं रचयति। तथैव ईश्वरोऽपि 'शरीरं रचयति।' शरीरं कि भवति? कथं कार्य करोति? इत्यादिकं सर्वं गरूडपुराणे निगदितम्। अतः गरूडपुराणे विद्यमानं 'शारीरविज्ञानम् इति विषयमधिकृत्य मया' शोधालेखमिदं विरचितम्।

गरूडपुराणे विद्यमानं ' शारीरविवेचनं त्रिधा विभक्तुं शक्यते।
1 शरीरस्वरूपम्
2 शरीरोत्पत्तिः
3 शरीरावयवानां परिचयः

**शरीरस्वरूपम् :–**
श्रृ हिंसायां धातुना शरीरं शब्दो निष्पद्यते। यस्य अहर्निशं ह्रासो भवति मृत्युं प्रति च गच्छति यत् तत् शरीरमुच्यते। अथ च दिह् उपचये धातुना देहः शब्दः व्युत्पद्यते। यावत् अङ्गप्रत्यङ्गादीनां वृद्धिः भवति

तावत् तस्य देहसंज्ञा भवति। इति कथयति डॉ. ब्रह्मानन्द त्रिपाठी। 8 अस्य शरीरस्य द्वादश नामानि सन्ति।

गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः।
कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनः।।9

सुश्रुताचार्येण ''दोषधातुमलं हि 'शरीरम्'' इत्युच्यते।10 आचार्यः चरकः 'तत्र शरीरं नाम चेतनाधिष्ठानभूतं पञ्चमहाभूतविकारसमुदायात्मकं समयोगवाहि।' इति कथयति।11 पञ्चात्मकं पञ्चसु वर्तमानं षडाश्रयं षडगुणयोगयुक्तं। ते सप्तधातुं त्रिमलं द्वियोनि चतुर्विद्याहारमयं शरीरं भवति। इति गर्भोपनिषदि वर्णितम्।12 गरूडपुराणे शरीरस्येदं लक्षणं विस्तरेण निगदितं। तद्यथा–

एकस्तम्भस्नायुबद्धं स्थुणाद्वयविभूषितम्।
इन्द्रियैश्च समायुक्तं नवद्वारं शरीरकम्।।
विषयैश्च समाक्रान्तं कामक्रोधसमाकुलम्।
रागद्वेषसमाकीर्णं तृष्णादुर्गति संयुतम्।।
लोभजालपरिच्छिन्नं मोहवस्त्रेण वेष्टितम्।
सुबद्धं माययाचैव चेतनाधिष्ठितं पुरम्।।
षट्कौषिकसमुत्पन्नं पुरं पुरूषसंश्रितम्।
एतद् गुणसमायुक्तं शरीरं सर्वदेहिनाम्।।13

गरूडपुराणकारः शरीरस्य यत् स्वरूपं निरूपयति तस्योपरि एतेषां सर्वेषामाचार्याणां प्रभावः परिलक्ष्यते। यथा शुश्रुताचार्यः केवलं दोषधातुमलमयं शरीरं मन्यते। चरको दोषधातुमलानां सममात्रायां योगो यदा पञ्चमहाभूत– विकारसमुदायात्मकं भवति चेतनाधिष्ठानभूतं च भवति तदैव तस्य शरीरसञ्ज्ञा भवति। गर्भोपनिषदि तदधिकं वर्णितं। गरूडपुराणे शरीरं स्नायुबद्धः स्तम्भो वर्तते। चरणरूपे स्थूणाद्वयाधिष्ठितं ज्ञानेन्द्रियैः कर्मेन्द्रियैश्च समायुक्तं भवति। अस्मिन् नवद्वाराणि भवन्ति। विषयैः समाक्रान्तं कामक्रोधरागद्वेषतृष्णालोभमोहमायादिभिः युक्तं षट्कौशिकयुक्तं चेतनाधिष्ठितं च भवति तदैव तस्य शरीरसञ्ज्ञा भवति। इति शरीरस्य सर्वविधज्ञानं भवति गरूडपुराणकारस्य शरीरलक्षणेन।

**शरीरोत्पत्तिः**

शरीरस्य उत्पत्तिः स्त्रीगर्भे भवति। गर्भस्य विस्तरेण विवेचनं करोति गरूडपुराणकारः गरूडपुराणस्य उत्तरार्धे प्रेतकल्पे द्वाविंशतितमेऽध्याये। तत्र गरूडपुराणकारः स्त्रीक्षेत्रम् औषधिपात्रं शुक्रं बीजममृताशनं नरं च बीजस्य वप्तारं मन्यते गर्भधारणप्रसङ्गे।

**तद्यथा–**

स्त्रीक्षेत्रमौषधिपात्रं बीजं वप्यामृताशनं।
तत्र वप्ता नरः सम्यग्जन्तुः तत्र निषिच्यते।14

शुक्रशोणितसंयोगेन एव मानवी सृष्टिर्जायते। पुरूषस्य शुक्रः स्त्रीबीजभागेन सह ऋतुकालस्य दिनचतुष्टयानन्तरं गर्भाशये मेलनं करोति तदा गर्भोत्पत्तिर्जायते।15 स्त्रीषु प्रतिमासं मासिकधर्मो भवति मासिकधर्मे योनिमुखात् विकृत आर्तवं निर्गच्छति। आर्तवश्रावस्य काल ऋतुकालः कथ्यते अयम् ऋतुकालो दिनचतुष्टयात्मको भवति। ऋतुकालो गर्भधारणाय निषिद्धो वर्तते।

**तद्यथा–**

ऋतुकाले तु नारीणां त्यजेद्दिनचतुष्टयम्।16

ऋतुकालस्य प्रथमरात्रितः षोडषरात्रिपर्यनतं गर्भधारणकालः उच्यते। अत्र प्रथमे सप्ताहे ऋतुकालस्य चतुर्दिनानन्तरं यद् गर्भधारणं भवति तन्मलिम्लुच्सञ्ज्ञकमुच्यते। तद्यथा–

सप्ताहात् पितृदेवानां भवेद्योग्याव्रतार्चने।
सप्ताहमध्ये योगर्भः तत् सम्भूतिर्मलिमम्लुचा।।17

गर्भधारणस्य कृते चतुर्दशमी रात्रिः श्रेष्ठा मन्यते।18 किन्तु इयं रात्रिः सामान्यजनानां गर्भधारणाय असम्भवा एव भवति।19 प्रायः अष्टमरात्रिर्प्यन्तमेव गर्भधारणं सञ्जायते।20 शुकशोणितसंयोगेनैव गर्भोत्पत्तिर्जायते।

**तद्यथा–**

शुक्रशोणितसंयोगे पिण्डोत्पत्तिः प्रजायते।21

इदमेव तथ्यं चरकसंहितायामपि वर्णितम्–

शुक्रशोणितसंयोगे तु खलु कुक्षिगते गर्भसञ्ज्ञा भवति।22

बीजरूपे शुक्रे शाश्वतं चैतन्यं तत्त्वं विद्यमानं भवति। अनेनैव कारणेन गर्भस्य वृद्धिर्भवति। यदा कामनावशात् मनः चित्तं उत्तेजितं करोति स्त्रीसम्पर्के द्रवीभूत्वा यत् निर्गत्य स्त्रीबीजेन मिलति तदैव गर्भधारणं भवति।

**तद्यथा–**

कामं चित्तं च शुक्रं च यदा ह्येकत्वमाप्नुयुः।
तदा द्रवमावाप्नोति योषा गर्भाशये नरः।।23

गर्भाधानात् पूर्वं मधुरं भोजनं ताम्बूलादिकं खादितव्यम्। अथ च मनोवृत्तिः शान्ता भवेत्। यतोहि निषेचसमये यादृशी चित्तवृत्तिः भवति तादृशी एव सन्ततिर्जायते।24 शुक्राधिक्येन नरः शोणिताधिक्येन स्त्रीजातकं भवति साम्यावस्थायां च षण्डत्वं च भवति।

**तद्यथा–**

रक्ताधिक्येन भवेन्नारी शुक्राधिक्येन भवेन्नरः।
शुक्रशोणितयोः साम्ये गर्भः षण्डत्वमाप्नुयुः।।25

युग्मासु रात्रिषु सम्मेलनेन पुत्रः अयुग्मासु रात्रिषु पुत्री भवति।26 किन्तु आधुनिक चिकित्सायां इदं तथ्यं न स्वीकृतम्। तत्र तु शुक्रगतं ''क्रोमोजम'' एव स्वीक्रियते।27 गर्भे भ्रूणस्य वृद्धि कथं भवति? इति वर्णितं गरूडपुराणे। गरूडपुराणकारस्य अन्येभ्यः आचार्येभ्यः कुत्र–कुत्र मत विपर्ययं वर्तते इति अनया तालिकया स्पष्टं भवति।

| अवधिः | गरूडपुराणम् 28 | गर्भोपनिशद् 29 | चरकः30 | सुश्रुतः 31 | वराहमिहिरः 32 |
|---|---|---|---|---|---|
| 1 अहोरात्रम् | कललम् | कललम् | – | – | – |
| 5 दिवसे | बुद्बुदम् | 7 दिवसे बुद्बुदम् | – | – | – |
| 10 दिवसे | मांसमिश्रधातुसमन्वितम् | 15 दिवसे पिण्डम | – | – | – |
| 20 दिवसे | घनमांसं वर्धते | – | – | – | – |
| 25 दिवसे | बलं पुश्टिष्च जायते | – | – | – | – |
| 1 मासे | पञ्च तत्तवानि धारयेत् | पिण्डं कठिनं भवति | खेटभूतः | कललम् | कललम् |
| 2 मासे | त्वाचमेदश्च जायेते | शिरः | घनम् | घनम् | घनम् |
| 3 मासे | मज्जास्थीनि जायन्ते | पादप्रदेशः | सर्वेन्द्रियाणि | हस्तपादशिर | अवयवाड्कुरम् |

| | | | | | |
|---|---|---|---|---|---|
| | | | सवयवम् | सा पञ्चपिण्डिका | |
| 4 मासे | कशाः गुल्फश्च जायन्ते | गुल्फः जठरः कटिप्रदेशाः | गर्भः स्थिरी भवति | अङ्ग–प्रत्यङ्गादीनां विभागः हृदयास्पन्दनं | अस्थि : |
| 5 मासे | कर्णौ नासिका कुक्षि च | पृश्ठवंशः | गर्भेमांसस्य उपचयः | मनः प्रतिबुद्धं | त्वचा |
| 6 मासे | कण्ठरन्ध्रम | मुख नासिकाक्षि–श्रोताणि | बलवर्णयोः उपचयः | बुद्धिप्रकटिता | श्रोमांसि |
| 7 मासे | गुह्यम् | जीवेन संयुक्तः | सर्वभावपरिपूर्ण | अङ्गप्रत्यङ्गादीनां विभागः अतिस्पश्टं | चैतन्यं |
| 8 मासे | अङ्गप्रत्यङग युक्तं सम्पूर्ण गर्भः | 8 प्रकृति 16 विकृति युक्तः बुद्धिः | अस्थिरोभूत्वा भ्रमति | चरकवत् | मातुः भुक्तंअन्नं गृह्णाति |
| 9 मासे | स्वीयारतिः बहिर्निर्गमनस्य इच्छा | ज्ञानेन्द्रियादिभिः युक्तः | – | – | गर्भस्थस्योद् वेगः |
| 9–10 मासे | अपानवायुनाकृ श्टेन प्रसुतिः | प्रसुतिः | प्रसूतिः | प्रसूतिः | प्रसूतिः |

**शरीरस्य प्रसूतिः**

नवमे दशमे वा मासे प्रसवकालिकापानवायुनाकृष्टः गर्भपीडया पीडितः मातुः सुषुम्नानाडीशक्त्या पुष्टः पञ्चभौतिकदेहात्मकः भ्रूणः प्राजापत्यवायुना गर्भात् बहिः निर्गच्छति। तद्यथोक्तं गरूडपुराणकारेण

नवमे दशमे वापि जायते यश्च भौतिकः।।
प्रसूतवायुनाकृष्टः पीडयाविह्वलीकृतः।
क्षितिवारिहविर्भोक्ता पवनाकाशमेव च।।
एभिर्भूतैः पीडितस्तु निबद्धः स्नायुबन्धनैः ।33

एवंप्रकारेण गरूडपुराणे गर्भधारणतः प्रसूतिपर्यन्तं भ्रूणस्य वृद्धिक्रमः सूक्ष्मातिसूक्ष्मदृष्ट्या निगदितः।

**शरीरावयवानां परिचयः**

अस्मिन् शरीरे अनेके अवयवाः भवन्ति। येषां सहयोगेन इदं शरीरं कार्यं करोति एतेषां अवयावानां परिचयः गरूडपुराणे विस्तेरण निरूप्यते गरूडपुराणकारेण।

**पञ्चमहाभूतानि**

पञ्चमहाभूतात्मके शरीरेऽस्मिन् समागतानां मनोभावानां अवयवानां तत्कार्याणां विस्तरेण विवेचनं प्राप्यते गरूडपुराणे गरूडकारमतेन शरीरस्यावयवाः महाभूतानां गुणरूपे तिष्ठन्ति।

| **महाभूतानि** | **गुणाः** |
|---|---|
| पृथ्वी | त्वगस्थिनाडीरोममांसानि पञ्चगुणाः |
| जलम् | लार मुत्रं शुक्रं मज्जा रक्तं च पञ्चगुणाः |
| तेजः | क्षुधा निद्रा तृश्णा आलस्यं कान्तिश्च पञ्चगुणाः |
| वायुः | धावनं श्वशनमाकुञ्चनं प्रसारणं निरोधः पञ्चगुणाः रागः द्वेशः लज्जा भयं मोहश्च वायुजाः पञ्चगुणाः |
| आकाशः | घोशः क्षिद्राणि माभ्भीर्यं श्रवणं सर्वसंश्रयः पञ्चगुणाः |

एतेषां पञ्चमहाभूतानां एते गुणाः भवन्ति शरीरे ।34

निष्कर्षरूपेण वक्तुं शक्यते यद् गरूडपुराणकारेण गरूडपुराणे शारीरं विज्ञानं सूक्ष्मतया विश्लेषितम्। तस्य शरीरलक्षणमायुर्वेदाश्रितं वर्तते। गर्भे शरीरोत्पत्तिः सूक्ष्मतया वर्णितम्। अथ च शरीरस्य अभ्यन्तरबाह्य अङ्गप्रत्यङगानां विवेचनं वैज्ञानिकपद्धत्या कृतम्। तेन अनेन सिद्धं भवति यद् गरूडपुराणे शारीरविज्ञानस्य सर्वेषामङगप्रत्यङगादीनां गूढतयाविवेचनं क्रियते गरूडपुराणकारेण।

**सन्दर्भ ग्रन्थ**


1 ‘आयुर्जीवितकालः’ अमरकोष 2/8/120
2 चरकसंहिता सूत्रस्थानम् 1.42
3 सुश्रुतसंहिता सूत्रस्थानम् 1.22
4 वेदांतसारः 105
5 गरूडपुराणम् 2.21.40–41
6 वेदांतसारः 106
7 ‘इन्द्रजालमहं मन्ये संसारेऽसारसागरे।’ गरूडपुराणम् 2.22.4
8 चरकसंहिता 1.1.42 व्याख्याप्रसङ्गे
9 अमरकोषः 2.6.69–72
10 सुश्रुतसंहिता सूत्रस्थानम् 15.3
11 चरकसंहिता शारीरस्थानम् 6.4
12 गर्भोपनिषद् 1
13 गरूडपुराणम् 2.21.35–38
14 तत्रैव 2.22.15–16
15 गरूडपुराण की दार्शनिक एवं आयुर्वेदिक सामग्री का

**अध्ययन पृ. 24**

16 गरूडपुराणम् 2.22.7
17 गरूडपुराणम् 2.22.10
18 गरूडपुराणम् 2.22.12
19 गरूडपुराणम् 2.22.13
20 गरूडपुराणम् 2.22.14
21 गरूडपुराणम् 2.22.18
22 चरकसंहिता शारीरस्थानम् 4.5
23 गरूडपुराणम 2.22.20
24 गरूडपुराणम 2.22.17–18
25 गरूडपुराणम 2.22.21
26 गरूडपुराणम 2.22.11
27 गरूडपुराणम की दार्शनिक एवं आयुर्वेदिक सामग्री का

**अध्ययन पृ. 25**

28 गरूडपुराणम 2.22.22–28
29 गर्भोपनिषद् 3
30 चरकसंहिता शारीरस्थानम् चतुर्थः अध्यायः
31 सुश्रुतसंहिता शारीरस्थानम् तृतीयः अध्यायः
32 वृहज्जातकम् 4.16
33 गरूडपुराणम् 2.22.45–46
34 गरूडपुराणम् 2.22.47–52